PRINTED BOOK

THE VEDIC PATH

Quarterly Journal of Vedic, Indological
and Scientific Research
Gurukula Kangri Vishwavidyalaya,
HARDWAR

No. 7

To,

____

____

____

If not delivered, please return to :
Dr. R. L. Varshney
Editor, Vedic Path
'Dreamland'
P. O. Gurukula Kangri-249 404
HARDWAR, U. P., INDiA.

① पेज = 1
= 31.5 X 13 X 0.1 c.m.
विषय = पूजा

महापातोभीमईशानाद्दवटनामाभी: पुष्पांजलि

... ...

सुसंकल्प्यधाशास्तयाप्रत्यहपूजाम्यहं स्वंसं-
-कल्प

② विषय - पूजा
पेज - 1

- 19X12.5 X 0.1 c.m.

वह्निर्बद्धस्तप्यतां इदं जलं तस्मै स्वधानमः ३

... ...

रुद्रादित्यसेमलीक इदं जलं तस्मै स्वधानयः ३
अमुकगोत्रोऽस्मत् मा

③ पेज = 1
= 27 X 16 X 0.1 c.m.

NO-7

सालानघ्रमांजालिभिवटगांधंगुरुपदेशाठदतं

. . .　　. . .　　. . .　　. . .

सकारषामासबंधुपुरोधास्तास्मि सामिद्धा

-द्विविलाजमो

महापातो भीम ईशानाद्युघ्नामभिः उर्ध्वांजलिरयं दत्वा स्तुत्वा स्तुत्वा पुनः पुनः क्षमापय
महेशानं प्रार्थयेत्तदनंतरं विरूपाक्ष महेशान विश्वरूप महेश्वर मयाकृतां त्वदापूजां
गृहीत्वा वरदो भव इति प्रार्थनामंत्रः मृत्युंजयाय यस्नाय देवदेवाय शंभवे आश्रिते
शाय पशवीय महादेवाय तेनम इति नमस्कारमंत्रः इति लिंगपूजाविधिः अथो द्याप
ने शिवस्य स्नानपत्नै नपंचामृतेन स्नपनं नालिकेरार्घ्यं चंच ध्वजपताके शिवोपरिष्टे
तव सद्गुणं देयं पूजायां च शिवस्य च पूजांते चतथा होमं तिलद्रव्येण कारयेत् ततस्त
दनंतरं पूजामाचार्यैणैव कारयेत् तत्रप्रार्थनामंत्रः नमः शिवाय शांताय सगणाय
ससूनवे सर्वेश्वराय देवाय कारणत्रयहेतवे निवेदयामि चात्मानं त्वंगतिः परमे
श्वर भूमौ स्खलितनपादानां भूमिरेवालयं वन त्वयि जातापराधानां त्वमेव शा
रणं प्रभो ततो विप्रा भोजनीयाः शक्त्या वा वाद शाथवा आचार्यं पूजयेत्तस्मै दे
त्वा पादयान्यदक्षिणां पूर्णतद्वचनात्कृत्वा मम सन्निधिमागमवेत् यद्द्वारेमंततमा
तेमाबाहुवेगास्तु रक्षमाः पूर्णेन्दुवदनानार्यो लिंगपूजाविधेः फलं इति ब्रह्म

ब्र० २८१

ऽपुराणोक्ततत्पूजातद्यापनविधिः तत्पूजाविधिं सूत्यः शृणु नान्यमनाः क्वचित् यां कृ
त्वामुच्यते पापैर्घोरैर्वा घनरोपि वा ब्रह्महत्यादिस्वामीद्रोहमहापैर्वाघनापहः सकृत्पू
जनमात्रेण मुच्यते किमुतान्यतः नातः परतरं किंचित्त्रिषु लोकेषु विद्यते किं कुलेन
किमाचारैः किं शीलेन गुणेन च यो हरिं पूजयेत्सम्यक्स कुलीनः स बुद्धिमान् सं
पूर्वीपैसगणभक्तपेजन्मयः प्राप्यमानवः इमामकृत्वा मूढात्मा कोन्यस्तस्माद्योग
तिः धर्महीनस्य मर्त्यस्य दिनानि यानि यांति च सत्नोहकारभस्त्रेव तस्य जन्म निर
र्थकं पूजयेत्पूजयेद्विष्णुं पूपो मूर्योपि पूजयेत् माघे वा कार्त्तिके चैत्रे प्राषाढे मा
र्गशिरेपि वा अन्येषु पुण्यमासेषु व्रतमेतत्समाचरेत् प्रातः स्नानं विधायाथ दंतधाव
न पूर्वकं धौतवस्त्रधरो भूत्वा नित्यकर्म समाचरेत् देवपूजागृहे वापि देवालय
मथापि वा गोमयेनानुलिप्याथ धूपेन गंधयेनवा चतुर्भिर्व्रीहिलक्षैः सार्द्धं कृ
त्वा चस्वस्तिवाचनं नांदीश्राद्धं च कुर्वीत तत्पूजाविधौ द्विज ब्राह्मणानामंत्र्य कृत्वा राम
देशकालौ वदेत्सुधीः सुसंकल्प्य यथाशक्त्या प्रत्यहं पूजयाम्यहं एवं संकल्प्य वि २८१

२

वह्निषदस्त्यतां इदं जलं तस्मै स्वधा नमः ३ यमाय न
मः ३ धर्मराजाय नमः ३ मृत्यवे नमः ३ अंतकाय नमः
३ वैवस्वताय नमः ३ कालाय नमः ३ सर्वभूतक्षयाय न
मः ३ उदंबराय नमः ३ दध्नाय नमः ३ नीलाय नमः ३
परमेष्ठिने नमः ३ वृकोदराय नमः ३ चित्राय नमः
३ चित्रगुप्ताय नमः ३ आगच्छंतु मे पितरः इमान्
गृह्णंतु तिलान् जलांजलीन् अमुकगोत्रोऽस्मत्पितामहः
रुद्रादित्यस्वरूपः सपत्नीक इदं जलं तस्मै स्वधा
नमः ३ अमुकगोत्रोऽस्मत्प्रपितामहः रुद्रादित्य
स्वरूप सपत्नीक इदं जलं तस्मै स्वधा नमः ३ अमुक
गोत्रोऽस्मत् वृद्धप्रपितामहः रुद्रादित्यः सपत्नीक
इदं जलं तस्मै स्वधा नमः ३ अमुकगोत्रोऽस्मन्मा

क्षं ७९ सा लाजधूमांजलिमिष्टगंधं गुरूपदेशाद्वदनं निनाय कपोलसंसर्पि
शिखः स तस्याः मुहूर्तकर्णोत्पलतां प्रपेदे ८० तदीषदार्द्रारुणगंडलेखमुच्छ्वा
सिकालांजनरागमक्ष्णोः वधूमुखं क्लान्तयवावतंसमाचारधूमग्रहणाद्बभू
व ८१ वधूं द्विजः प्राह तवैष वत्से वह्निर्विवाहं प्रति कर्मसाक्षी शिवेन भर्त्रा सह ध
र्मचर्या कार्या त्वया मुक्तविचारयेति ८२ आलोचनान्तं श्रवणे वितत्य पीतं गुरो
स्तद्वचनं भवान्याः निदाघकालोल्बणतापयेव माहेन्द्रमंभः प्रथमं पृथिव्याः ८३
ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन सा दृष्ट इत्याननमुन्नमय्य
ह्रीसन्नकंठी कथमप्युवाच ८४ इत्थं विधिज्ञेन पुरोहितेन प्रयुक्तपाणिग्रहणो
पचारौ प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय ८५ वधूर्विधा
त्रा प्रतिनंद्यते स्म कल्याणि वीरप्रसवा भवेति वाचस्पतिः सन्नपि सोष्टमूर्तावाशा
स्यचिन्तास्तिमितो बभूव ८६ क्लृप्तोपचारां चतुरस्रवेदीं तावेत्य पश्चात्कनकास
नस्थौ जायापती लौकिकमेषितव्यमार्द्राक्षतारोपणमन्वभूतां ८७ पत्रान्तल
ग्नैर्जलबिंदुजालैराकृष्टमुक्ताफलजालशोभं तयोरुपर्यायतनालदंडमाधत्त

धूमसीमांतिनेवविनीतैरवरोधरद्धैः वेलासकाशं स्फुटफेनराजिर्नवैरुदन्वानिव चंद्र
पादैः २२ तया प्रवृद्धाननचंद्रकांत्या प्रफुल्लचक्षुःकुमुदः कुमार्याः प्रसन्नचेतः
सलिलः शिवोऽभूत्संसृज्यमानः शरदेव लोकः २३ तयोः समापत्तिषु कातरा
णि किंचिद्व्यवस्थापितसंहृतानि ह्रीयंत्रणां मानयिरे मनोज्ञामन्योन्यलो
लानि विलोचनानि २४ तस्याः करं शैलगुरूपनीतं जग्राह ताम्रांगुलिमष्ट
मूर्तिः उमातनौ गूढतनोः स्मरस्य तच्छंकिनः पूर्वमिव प्ररोहं २५ रोमो
द्गमः प्रादुरभूदुमायाः स्विन्नांगुलिः पुंगवकेतुरासीत् वृत्तिस्तयोः पाणिसमा
गमेन समं विभक्तेव मनोभवस्य २६ प्रयुक्तपाणिग्रहणं यदन्यद्वधूवरं पुष्य
ति कांतिमग्र्यां सांनिध्ययोगादनयोस्तदानीं किं कथ्यते श्रीरुभयस्य तस्य २७
प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं चकासे मेरोरुपांतेष्विव वर्त्त
मानमन्योन्यसंसक्तमहस्त्रियामं २८ तौ दंपती त्रिः परिणीय वह्निमन्योन्यसं
स्पर्शनिमीलिताक्षौ सकारयामास वधूं पुरोधास्तस्मिन्समिद्धार्चिषि लाजमो